भदनवान्यलग्नरन्ध्रे ष्वशुभयुतोमरणाय शीतरश्मिः । भृगुसुतशशिपुत्रदेवपूज्यैर्य्यदि बलिभिर्न युतोऽवलोकितो-वा" । पापयुतचन्द्रारिष्टम् । "द्यूनचतुरस्रसंस्थे पाप-द्वयमध्यगे शशिनि जातः । विलयं प्रयाति नियतं देवैरपि रक्षितोबालः" । पापमध्यगचन्द्रारिष्टम् । "क्षीणे शशिनि विलग्ने पापैः केन्द्रेषु मृत्युसंस्थैर्वा । भवति विपत्तिरवश्यं जननाधिपतेर्मतञ्चैतत्" । क्षीणचन्द्रारिष्टम् । "नागदगो१ सिद्ध२४ जातो२२ षु५ क्षमा१ ब्धि४ नग्नि २२ धृति१८ नखाः २०। क्षमाग्नि २१ दिक्१० चेत्यजा द्यंशे तत्तुल्याब्दैर्विधौ व्यसुः" । मेषादीनां त्रिंशांश-विशेषस्थचन्द्रारिष्टम् । "भौमे विलग्ने शुभदैरदृष्टः षष्ठे-ऽष्टमे वार्कसुतेन युक्तः । सद्यः शिशुं हन्ति वदेन्मुनीन्द्रः क्रूरे यमारौ न शुभेक्षितौ च" । त्रिविधभौमारिष्टम् । "कर्कटधामनि सौम्यः षष्ठाष्टमराशिगोविलग्नर्क्षात् । चन्द्रेण दृष्टमूर्त्तिर्वर्षचतुष्टयेन मारयति" । बुधारिष्टम् । "वृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः । वर्षैस्त्रिभिर्भार्गवदृष्टिहीनोलोकान्तरं प्रापयति प्रसूतम्" वृहस्पतिरिष्टम् । "रविशशिभवने शुक्रोद्वादशारिपुरन्ध्र-गोऽशुभैः सर्व्वैः । दृष्टः करोति मरणं षड्भिर्वर्षैः किमिह विचित्रम्" । शुक्रारिष्टम् । "मारयति षोडशाहात् शनैश्चरः पापवीक्षितोलग्ने । संयुक्तोमासेन वर्षाच्छ्रु द्वस्तु मारयति" । त्रिविधशनिरिष्टम् । "राहुश्चतुष्टयस्थोमर-णाय वीक्षितोभवति पापैः । वर्षैर्वदन्ति दशभिः षोड़शभिः केचिदाचार्य्याः । घटसिंहवृश्चिकोदयक्तस्थितिर्जीवितं हरति राहुः । पापैर्निरीक्ष्यमाणः सप्तमितैर्निश्चितं वर्षैः" । राहुरिष्टम् । "केतुर्य्यस्मिन् वृक्षेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः । रौद्रे सर्पमुहूर्त्ते प्राणैः संत्यज्यते चाशु" । केतुरिष्टम् । "लग्ने ये द्रेक्काणा निगड़ाहिविहङ्गमपाश-धरसंज्ञाः । मरणाय सप्तवर्षैः क्रूरयुताः खपतिदृष्टाः" । द्रेक्काणरिष्टम् । "मीनकर्कटयोरन्त्यौ वृश्चिकस्याद्यमध्यमौ । सर्पाश्चत्वार एवैते द्रेक्काणा निगड़ाश्च ते । तुलामध्यान्त्य-सिंहाश्च कुम्भाद्याः पक्षिणः स्मृताः । वृषाद्यमकराद्यन्त्या द्रेक्काणाः पाशधारिणः" । लग्नाधिपजन्मपती षष्ठाष्टमरिपु-फगौ प्रसवकाले । अस्तमितौ मरणकरौ राशिप्रमितैर्वदे-द्वर्षैः । जन्मपतिर्जन्मराश्यधिपः । लग्नाधिपजन्माधिपरिष्टम् "सौम्याः षष्ठाष्टमगाः पापैर्वक्रोपगतैर्दृष्टाः । मासेन मृत्यु-दास्ते यदि न शुभैस्तत्र संदृष्टाः" । सौम्यग्रहरिष्टम् । "एकः पापोऽष्टमगः शत्रुगृही शत्रुवीक्षितोवर्षात् । मार-यति नरं प्रसूतं सुधारसौघेन पीतोऽपि" । पापग्रहरिष्टम् । "होरायाः सप्तमे सौरिर्हिवुकस्थश्च भास्करः । अस्मिन् योगे तु योजातः सोऽल्पायुर्भवति प्रिये । वसुषष्ठगते जीवे समसप्तगते शनौ । द्वादशस्थोयदा भानुर्वर्षमेकं न जीवति" । "प्रतिपद्युत्तराषाढ़ा नवम्यामेव कृत्तिका । पूर्व्वभाद्रपदाष्ट-म्यामेकादश्याञ्च रोहिणी । द्वादश्याञ्च यदाश्लेषा त्रयोदश्यां यदा मघा । एभिर्जातोन जीवेत यदि शक्र-समोभवेत्" । एवमन्येऽपि अल्पायुर्योगा आकरे दृश्याः । मनुना तु "अनभ्यासेन वेदानामाचारस्य तु वर्ज्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" इति अन्न-दोषादेरपि अल्पायुर्हेतुतोक्ता । अन्नदोषश्च अभक्ष्य भक्षणादि तच्चाभक्ष्यशब्दे उक्तम् आचारश्च आचारशब्दे वक्ष्यते ।

**अल्पाल्प** त्रि० अल्पप्रकारः अतिशयेन वा अल्पः अल्प+ प्रकारादौ द्विरुक्तिः । अत्यन्ताल्पे पादादौ "फलं चाल्पाल्पकं तस्य धर्म्मस्याङ्गक्षयो भवेत्" ति० त० स्मृ० ।

**अल्पिका** स्त्री अल्पा प्रमाणेन कन् । १मुद्गपर्ण्याम् । अल्पार्थे कन् । २अल्पमात्रायाम् ।

**अल्पित** त्रि० अल्पं क्रियते स्म अल्प+ कृत्यर्थे णिच्—कर्म्म-णि क्त । अल्पीकृते "मृषा न चक्रेऽल्पितकल्पपादपः" नै० ।

**अल्पिष्ठ** त्रि० अतिशयेन अल्पः इष्ठन् । अतिशयिताल्पे ।

**अल्पीयस्** त्रि० अतिशयेन अल्पः ईयसुन् स्त्रियां ङीप् । अति शयिताल्पे ।

**अल्ला** स्त्री अल्यते इत्यल् क्विप् अले भूषार्थे लाति गृह्णाति ला—क४त० । १मातरि । अलतीति अल् पर्य्याप्तः सन् लाति सर्व्वानत्ति गृह्णाति जानाति वा ला—क । २सर्व्वज्ञायां सर्व्वभक्षिकायां परमात्मदेवतायाम् सा च अथर्व्ववेदे अल्लाल्लेत्यादिसूक्ते प्रसिद्धा ।

**अव** रक्षणे, गतौ, स्पृहायां, तृप्तौ, शोभायां, श्रवणे, व्याप्तौ आलिङ्गने, प्रार्थने, प्रवेशे, सत्तायां, वृद्धौ, ग्रहणे, बधे, सामर्थ्ये, अवगमे, करणे, इच्छोत्पादने च यथायथं सक० अक० च भ्वादि० सेट् पर० । अवति आवीत् । आव । अव्यात् । अविता । अविताः अवन् । अविषः । "अवतु वोगिरिसुता शशिभृतः प्रियतमा" उद्भ० । "अरि-समुदयादवतः" नलोदयः । "प्रविष्टोमिनमाविषुः" । य० २३,२९, तत्र तर्पणे "न सामवति सद्वीपा रत्नसूरपि मेदिनी" रघुः । रक्षणे "यदाविथ सखीयतो यदाविथ" ऋ० १,१२१,५, "आविथ रक्षसि अन्यत्र तर्पयसि" भा० गतौ च आनो "बर्हिः सदताविता" ७,५९,६, "अविता